योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२१

अज्ञातलेखकः

श्रीदेव्युवाच ।

प्रतिभान्ति जगन्त्याशु मृतिमोहादनन्तरम् ।

जीवस्योन्मीलनादक्ष्णो रूपाणीवाखिलान्यलम् ।। १

दिक्कालकलनाकाशधर्मकर्ममयानि च ।

परिस्फुरन्त्यनन्तानि कल्पान्तस्थैर्यवन्ति च ।। २

नानुभूतं न यद्दृष्टं तन्मया कृतमित्यपि ।

तत्क्षणात्स्मृतितामेति स्वप्ने स्वमरणं यथा ।। ३

भ्रान्तिरेवमनन्तेयं चिद्व्योमव्योम्नि भासुरा ।

अपकुड्या जगन्नाम्नी नगरी कल्पनात्मिका ।। ४

इदं जगदयं सर्गः स्मृतिरेवेति जृम्भते ।

दूरकल्पक्षणाभ्यासविपर्यासैकरूपिणी ।। ५

नानुभूतानुभूता च ज्ञप्तिरित्थं द्विरूपिणी ।

पूर्वकारणरिक्तैव चिद्रूपैव प्रवर्तते ।। ६

नानुभूतेऽनुभूतत्वसंविदन्तरुदेत्यपि ।

स्वप्नभ्रमादावन्यस्मिन्पितरीव पितुः स्मृतिः ।। ७

कदाचित्स्मृतितां त्यक्त्वा प्रतिभामात्रमेव सत् ।

भाति प्रथमसर्गेषु रूपेण तदनुक्रमात् ।। ८

दृश्यं त्रिभुवनादीदमनुभूतं स्मृतौ स्थितम् ।

केषांचित्तन्वि केषांचिन्नानुभूतं स्मृतौ स्थितम् ।। ९

प्रतिभासत एवेदं केषांचित्सरणं विना ।

चिदणूनां प्रजेशत्वं काकतालीयवद्यतः ।। १०
अत्यन्तविस्मृतं विश्वं मोक्ष इत्यभिधीयते ।
ईप्सितानीप्सिते तत्र न स्तः काचन कस्यचित् ।। ११
अत्यन्ताभावसंपत्तिं विनाहन्ताजगत्स्थितेः ।
अनुत्पादमयी ह्येषा नोदेत्येव विमुक्तता ।। १२
रज्ज्वां सर्पभ्रमः सर्पशब्दार्थासंभवं स्थितम् ।
अनुत्पादमयं त्यक्त्वा शान्तोऽपि हि न शाम्यति१३
अर्धशान्तो न शान्तोऽसौ समेत्यर्थतया पुनः ।
उदेत्येकपिशाचान्ते पिशाचोऽन्यो ह्यधीमतः ।। १४
संसारश्चायमाभोगी परमेवेति निश्चयः ।
कारणाभावतो भाति यदिहाभातमेव तत् ।। १५
लीलोवाच ।
ब्राह्मणब्राह्मणीरूपे सर्गे कारणसंस्मृतिः ।
कथमभ्युत्थिता सास्य स्मरणीयमिदं विना ।। १६
श्रीदेव्युवाच ।
पितामहस्मृतिस्तत्र कारणं तस्य न स्मृतिः ।
पूर्वं न संभवत्येव मुक्तत्वात्पूर्वजन्मनः ।। १७
पूर्वं न संभवत्येव स्मरणीयमिति स्वयम् ।
पद्मजादित्वमायाति चैतन्यस्य तथास्थितेः ।। १८
अभूवमहमित्यन्यः प्रजानाथः प्रजापतेः ।
काकतालीयवत्कश्चिद्भवति प्रतिभामयः ।। १९
एवमभ्युदिते लोके न किंचिन्न कदाचन ।
क्वचिदभ्युदितं नाम केवलं चिन्नभः स्थितम् ।। २०
द्विविधायाः स्मृतेरस्याः कारणं परमं पदम् ।
कार्यकारणभावोऽसावेक एव चिदम्बरे ।। २१
कार्यं च कारणं चैव कारणैः सहकारिभिः ।

कार्यकारणयोरैक्यात्तदभावान्न शाम्यति ।। २२

महाचिद्रूपमेव त्वं स्मरणं विद्धि वेदनम् ।

कार्यकारणता तेन स शब्दो न च वास्तवः ।। २३

एवं न किंचिदुत्पन्नं दृश्यं चिज्जगदाद्यपि ।

चिदाकाशे चिदाकाशं केवलस्वात्मनि स्थितम् ।। २४

लीलोवाच ।

अहो नु परमा दृष्टिर्दर्शिता देवि मे त्वया ।

रूपश्रीर्जागती प्रातः प्रभयेवेक्षणद्युतिः ।। २५

इदानीमहमेतस्यां यावत्परिणता दृशि ।

नाभ्यासेन विना तावद्भिन्धीदं देवि कौतुकम् ।। २६

यत्रासौ ब्राह्मणो गेहे ब्राह्मण्या सहितोऽभवत् ।

तं सर्गं तं गिरिग्रामं नय मां तं विलोकये ।। २७

श्रीदेव्युवाच ।

अचेत्यचिद्रूपमयीं परमां पावनीं दृशम् ।

अवलम्ब्येममाकारमवमुच्य भवामला ।। २८

ततः प्राप्स्यस्यसंदेहं व्योमात्मानं नभःस्थितम् ।

भूमिष्ठनरसंकल्पो गगनान्तः पुरं यथा ।। २९

एवं स्थिते तं पश्यावः सह सर्गमनर्गलम् ।

अयं तद्दर्शनद्वारे देहो हि परमार्गलम् ।। ३०

लीलोवाच ।

अमुना देवि देहेन जगदन्यदवाप्यते ।

न कस्मादत्र मे युक्तिं कथयानुग्रहाग्रहात् ।। ३१

श्रीदेव्युवाच ।

जगन्तीमान्यमूर्तानि मूर्तिमन्ति मुधाग्रहात् ।

भवद्भिरवबुद्धानि हेमानीवोर्मिकाधिया ।। ३२

हेम्न्यूर्मिकारूपधरेऽप्यूर्मिकात्वं न विद्यते ।

यथा तथा जगद्रूपे जगन्नास्ति च ब्रह्मणि ।। ३३

जगदाकाशमेवेदं ब्रह्मैवेह तु दृश्यते ।

दृश्यते काचिदप्यत्र धूलिरम्बुनिधाविव ।। ३४

अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ।

अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ।। ३५

ब्रह्मैव पश्यति ब्रह्म नाब्रह्म ब्रह्म पश्यति ।

सर्गादिनाम्ना प्रथितः स्वभावोऽस्यैव चेदृशः ।। ३६

न ब्रह्मजगतामस्ति कार्यकारणतोदयः ।

कारणानामभावेन सर्वेषां सहकारिणाम् ।। ३७

यावदभ्यासयोगेन न शान्ता भेदधीस्तव ।

नूनं तावदतद्रूपा न ब्रह्म परिपश्यसि ।। ३८

तत्र रूढिमुपायाता य इमे त्वस्मदादयः ।

अभ्यासाद्ब्रह्मसंपत्तेः पश्यामस्ते हि तत्परम् ।। ३९

संकल्पनगरस्यैव ममाकाशमयं वपुः ।

ब्रह्मैव चान्तः पश्यामि देहेनानेन तत्पदम् ।। ४०

विशुद्धज्ञानदेहार्हास्तथैते पद्मजादयः ।

ब्रह्मात्मजगदादीनामंशे संस्थानमङ्गने ।। ४१

तवाभ्यासं विना बाले नाकारो ब्रह्मतां गतः ।

स्थितः कलनरूपात्मा तेन तन्नानुपश्यसि ।। ४२

यत्र स्वसंकल्पपुरं स्वदेहेन न लभ्यते ।

तत्रान्यसंकल्पपुरं देहोऽन्यो लभते कथम् ।। ४३

तस्मादेनं परित्यज्य देहं चिद्व्योमरूपिणी ।

यत्पश्यसि तदेवाद्य कुरु कार्यविदांवरे ।। ४४

संकल्पनगरं सत्यं यथासंकल्पितं प्रति ।

संदेहं वा विदेहं वा नेतरं प्रति किंचन ।। ४५

आदिसर्गे जगद्भ्रान्तिर्यथेयं स्थितिमागता ।

तथा तदाप्रभृत्येवं नियतिः प्रौढिमागता ।। ४६

लीलोवाच ।

त्वयोक्तं देवि गच्छावो ब्राह्मणब्राह्मणी जगत् ।

सहेतीदमिदं वच्मि कथं गन्तव्यमम्ब हे ।। ४७

इमं देहमिहास्थाप्य शुद्धसत्त्वानुपातिना ।

चेतसा तं परं यामि लोकं त्वं कथमेषि तत् ।। ४८

श्रीदेव्युवाच ।

संकल्पव्योमवृक्षस्ते यथा सन्नपि खात्मकः ।

न कुड्यात्मा न कुड्येन रोध्यते नापि कुड्यहा ।। ४९

शुद्धैकसत्त्वनिर्माणं चिद्रूपस्यैव तत्किल ।

प्रतिभानमतस्तस्मात्परस्वाद्भिद्यते मनाक् ।। ५०

सोऽयमेतादृशो देहो नैनं संत्यज्य याम्यहम् ।

अनेनैव तमाप्नोमि देशं गन्धमिवानिलः ।। ५१

यथा जलं जलेनाग्निरग्निना वायुनानिलः ।

मिलत्येवमतो देहो देहैरन्यैर्मनोमयैः ।। ५२

नहि पार्थिवतासंविदेत्य पार्थिवसंविदा ।

एकत्वं कल्पनाशैलशैलयोः क्वाहतिर्मिथः ।। ५३

आतिवाहिक एवायं त्वादृशैश्चित्तदेहकः ।

आधिभौतिकताबुद्ध्या गृहीतश्चिरभावनात् ।। ५४

यथा स्वप्ने यथा दीर्घकालध्याने यथा भ्रमे ।

यथा च सति संकल्पे यथा गन्धर्वपत्तने ।। ५५

वासनातानवं नूनं यदा ते स्थितिमेष्यति ।

तदातिवाहिको भावः पुनरेष्यति देहके ।। ५५

लीलोवाच ।

आतिवाहिकदेहत्वप्रत्यये घनतां गते ।

तामवाप्नोत्ययं देहो दशामाहो विनश्यति ।। ५७

श्रीदेव्युवाच ।

यदस्ति नाम तत्रैव नाशानाशक्रमो भवेत् ।

वस्तुतो यच्च नास्त्येव नाशः स्यात्तस्य कीदृशः ।।५८

रज्ज्वां सर्पभ्रमे नष्टे सत्यबोधवशात्सुते ।

सर्पो न नष्ट उन्नष्टो वेत्येवं कैव सा कथा ।। ५९

यथा सत्यपरिज्ञानाद्रज्ज्वा सर्पो न दृश्यते ।

तथातिवाहिकज्ञानाद्दृश्यते नाधिभौतिकः ।। ६०

कल्पनापि निवर्तेत कल्पिता यदि केनचित् ।

सा शिला समपास्तैव या नेहास्ति कदाचन ।। ६१

परं परे परापूर्णमिदं देहादिकं स्थितम् ।

इति सत्यं वयं भद्रे पश्यामो नाभिपश्यसि ।। ६२

आदिसर्गे भवेच्चित्त्वं कल्पनाकल्पितं यदा ।

तदा ततः प्रभृत्येकसत्त्वं दृश्यमवेक्षते ।। ६२

लीलोवाच ।

एकस्मिन्नेव संशान्ते दिक्कालाद्यविभागिनि ।

विद्यमाने परे तत्त्वे कलनावसरः कुतः ।। ५४

श्रीदेव्युवाच ।

कटकत्वं यथा हेम्नि तरङ्गत्वं यथाम्भसि ।

सत्यत्वं च यथा स्वप्नसंकल्पनगरादिषु ।। ६५

नास्त्येव सत्यनुभवे तथा नास्त्येव ब्रह्मणि ।

कल्पनाव्यतिरिक्तात्मतत्स्वभावादनामयात् ।। ६६

यथा नास्त्यम्बरे पांसुः परे नास्ति तथा कला ।

अकलाकलनं शान्तमिदमेकमजं ततम् ।। ६७

यदिदं भासते किंचित्तत्तस्येव निरामयम् ।

कचनं काचकस्येव कान्तस्याऽतिमणेरिव ।। ६८

लीलोवाच ।

एतावन्तं चिरं कालमेते देवि वयं वद ।

भ्रामिताः केन नामापि द्वैताद्वैतविकल्पनैः ।। ६९

श्रीदेव्युवाच ।

अविचारेण तरले भ्रान्तासि चिरमाकुला ।

अविचारः स्वभावोत्थः स विचाराद्विनश्यति ।। ७०

अविचारो विचारेण निमेषादेव नश्यति ।

एषा सत्तैव तेनान्तरविद्यैषा न विद्यते ।। ७१

तस्मान्नैवाविचारोऽस्ति नाविद्यास्ति न बन्धनम् ।

न मोक्षोऽस्ति निराबाधं शुद्धबोधमिदं जगत् ।। ७२

एतावन्तं यदाकालं त्वयैतन्न विचारितम् ।

तदा न संप्रबुद्धा त्वं भ्रान्तैवाभव आकुला ।। ७३

अद्यप्रभृति बुद्धासि विमुक्तासि विवेकिनी ।

वासनातानवं बीजं पतितं तव चेतसि ।। ७४

आदावेव हि नोत्पन्नं दृश्यं संसारनामकम् ।

यदा तदा कथं तेन वास्यन्ते वासनापि का ।। ७५

अत्यन्ताभावसंपत्तौ द्रष्टृदृश्यदृशां मनः ।

एकध्याने परे रूढे निर्विकल्पसमाधिनि। ।। ७५

वासनाक्षयबीजेऽस्मिन्किंचिदङ्कुरिते हृदि ।

क्रमान्नोदयमेष्यन्ति रागद्वेषादिका दृशः ।। ७७

संसारसंभवश्चायं निर्मूलत्वमुपैष्यति ।

निर्विकल्पसमाधानं प्रतिष्ठामलमेष्यति ।। ७८

विगतकलनकालिमाकलङ्का

गगनकलान्तरनिर्मलाम्बनेन ।

सकलकलनकार्यकारणान्तः

कतिपयकालवशाद्भविष्यसीति ।। ७९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे विश्रान्त्युपदेशो नामैकविंशः सर्गः ।। २१ ।।